Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 1 | ISSN : 2581- 6306

# अभिनयसन्दर्भे भवभूतेः रंगदृष्टिः सूक्ष्मा सुमनोहरा च

**डॉ0 भरत वर्मा**
**अतिथि प्रवक्ता**
**विभाग–संस्कृत**
**इलाहाबाद विश्वविद्यालय, इलाहाबाद।**

महाकविभवभूतिः प्रसिद्धः सिद्धश्च नाटककारः अस्ति, इति विश्रुतमेव। भवभूतेः रंगनाट्यदृष्टिः सफला, सिद्धा मनोहरा च। यथा सः सिद्धनाटककारः आसीत् तथैव तस्य अभिनयदृष्टिः तथैव नाट्यदृष्टिः अपि सूक्ष्मा सुमनोहरा सिद्धा च वर्तते। महाकवेः भवभूतेरभिनयस्य साफल्यं अनेनैव प्रतीयते यत् तेन विरचिते द्वे रूपके महावीरचरितम् मालतीमाधवं च तस्य समये एव कालप्रियनाथस्य यात्रा समये त्वभिनीते। यथा अनेनोल्लेखेन स्पष्टम्–

**''प्राचेतसो मुनिवृषा पतयः कवीनां**
**यत्पावनं रघुपतेः प्रणिनाय वृत्तम्।**
**भक्तस्य तत्र समरंसत मेऽपिवाच**
**स्ताः सुप्रसन्नमनसः कृतिनो भजन्ताम्।।**

– महावीरचरितम् 1/7

अस्य भवभूतेः रचनात्वेन त्रीणि नाटकानि प्रसिद्धानि, तत्र महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितम् च।

भवभूतिः यथा पदवाक्यप्रमाणज्ञः अस्ति। तथैव सः नाट्यशास्त्रज्ञः अपि अस्ति। नाट्यशास्त्रस्य निर्देशान् अवलम्बयैव तेन रूपकाणां रचना कृतम्। अभिनयदृष्ट्या एव रूपकाणां प्रणयनं तेन कृतमस्ति। तस्य नाट्यवैभवस्य चर्चा विश्लेषणं वा नाट्यशास्त्राधारेणैव कर्तुं शक्यते।

भरतमुनेः नाट्यशास्त्रे स्पष्टीकृतानि यत्र दृश्यं श्रव्यं च भेदेन काव्यं द्विधा भवति। श्रव्यकाव्यस्य पुनः भेदत्रय भवति– गद्यं पद्यं मिश्रं च। अभिनवगुप्तचार्येण कथितं यतृ दृश्यमिति हृद्यं श्रव्यमिति व्युत्पत्तिप्रदमिति प्रीतिव्युत्पत्तिदमित्यर्थं इति।[1] अतएव उक्तिरियं प्रसिद्धा ''काव्येषु नाटकं रम्यम्[2]।

श्रव्यकाव्यस्य केवलं श्रवणं भवति किन्तु दृश्यकाव्यस्य श्रवणेन सह दर्शनमपि भवति। दर्शनं अभिनयेन भवति अतः नाटके रूपकेषु वा अभिनयः प्रमुखः भवति। महामुनिना भरतेन 'अभिनय' इति शब्दस्य लक्षणं एवं प्रकारेण कथितम्–

**अभिनयपूर्वस्य णीञ् धातुराभिमुख्यार्थ निर्णये।**
**यस्मात् प्रयोगं नयति तस्मादभिनयः स्मृतः।।**[3]

**विभावयाति यस्माच्च नानार्थान् हि प्रयोगतः।**

**शाखांगोपांगसंयुक्तस्तस्मादभिनयः स्मृतः।।**[4]

अनेकान् अर्थान् नाट्यप्रयोगेन सांगोपांगेन अभिव्यंजयति अतः अभिनय इति कथ्यते। शब्दोऽयं 'अभि' उपसर्गेण सह 'णीञ्' धातोः योगेन निष्पन्नः भवति। अभिनवगुप्तेन 'अभिनय' इत्यस्य विषये उक्तम्–

अभिनय इति कस्मात्? अत्रोच्यते–अभित्युपसर्गः। णीञित्ययं धातुः प्रापणार्थः। साहित्यदर्पणे 'भवेदभिनयोऽवस्थानुकारः' इति अभिनयस्य स्वरूपं कथतमस्ति।[5] अभिनयोऽयं चतुर्विधः भवति– आंगिक, वाचिकः, आहार्यः सात्विकश्च।

**आंगिको वाचिकश्चैव ह्याहार्थः सात्त्विकस्तथा।**

**ज्ञेयस्त्वभिनयो विपाश्चतुर्द्धा परिकीर्तितः।।**[6]

**आर्य नन्दिकेश्वर चतुर्विध अभिनयस्य सम्बन्धं शिवेन सह करोति–**

**आंगिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।**

**आहार्य चन्द्रतारादित्तंनुमः सात्विकं शिवम्।।**[7]

अस्मिन् वाचिकाभिनये षट्त्रिशत् लक्षणानां समायोजनं भवति। एतानि नाट्यलक्षणानि एवं प्रकारेण सन्ति–

(1) भूषणम् (2) अक्षरसङ्घतम् (3) शोभा (4) उदाहरणम् (5) हेतुः (6) संशयः (7) दृष्टान्तः (8) प्राप्तिः (9) अभिप्रायः (10) निदर्शनम् (11) निरुक्तम् (12) सिद्धिः (13) विशेषणम् (14) गुणनिपातः (15) अतिशयः (16) तुल्यतर्कः (17) पदोच्चयः (18) दिष्टम् (19) उपदिष्टम् (20) विचारः (21) विपर्ययः (22) भ्रंशः (23) अनुनयः (24) माला (25) दाक्षिण्यम् (26) गर्हणम् (27) अर्थापत्तिः (28) प्रसिद्धि (29) पृच्छा (30) सारुप्यम् (31) मनोरथः (32) लेशः (33) क्षोभः (34) गुणकीर्तनम् (35) अनुक्तसिद्धि (36) प्रियोक्तिः।[8]

महाकविभवभूतेः त्रिषु रूपकेषु एतानि लक्षणानि समुचितरूपेण विन्यस्तानि सन्ति। एतेषु लक्षणेषु पदोच्चयप्राप्तिसिद्धितुल्यतर्कदृष्टान्तविचार– गुणनिपातगर्हणभ्रंशदाक्षिण्यादीनि लक्षणानि प्रमुख्येन विन्यस्तानि सन्ति। तानि एवं प्रकारेण सन्ति–

उदाहरणम्–

उदाहरणनामकं लक्षणं उत्तररामचरितस्य द्वितीयाऽङ्के प्राप्यते। अस्मिन् अंकस्य विष्कम्भके आत्रेय्याः कथने उदाहरणस्य प्रयोगः दृश्यते। कथनं इत्थमस्ति–

**वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे**

**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**

**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा।**

**प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः।।**[9]

कथनेऽस्मिन् समानार्थकैः वाक्यैः अन्यस्य अर्थस्य प्रकटनं कृत्वा स्वप्रयोजनं साधितमस्ति। अतः उदाहरणनामकं लक्षणम् अत्रास्ति। उदाहरणस्य स्वरूपं नाट्यशास्त्रे एवं प्रकारेण वर्णितमस्ति।

**यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।**

**साध्यते निपुणैरर्थस्तदुदाहरणं स्मृतम्।।**[10]

हेतुः–

उत्तररामचरितस्य प्रथमाऽङ्के रामस्य इयं उक्तिः 'हेतु' इति नाट्यलक्षणस्य उदाहरणमस्ति।

**सतां केनापि कार्येण लोकस्याराधनं मतम्।**

**यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्जता।।**[11]

रामस्य कथनेऽस्मिन् इष्टस्य प्राप्तिः या उल्लिखिता सा प्राप्तिः समासेन हृदयग्राहि–रीत्या वर्णिताऽस्ति, अतः अत्र हेतुर्नामकं नाट्यलक्षणं अस्ति इति वक्तुं शक्यते।[12]

दृष्टान्तम्– नाट्यशास्त्रे दृष्टान्तनाट्यलक्षणस्य स्वरूपं एवं प्रकारेण कथितमस्ति यत्–

**यत्र कस्यापि विषयस्य पक्षस्य वा समर्थनं हेतूदाहरणाभ्यां**

**मनोरंजकस्वरूपेण क्रियते तदा दृष्टान्तनाट्यलक्षणं भवति।**[13]

रामचरितस्य षष्ठे अंके रामस्य कथनमिदं दृष्टान्तनाट्यलक्षणस्य उदाहरणमस्ति। कथनेऽस्मिन् रामेण लवस्य कृतपरांकमस्य समर्थनं सोदाहरणं कृतमस्ति–

**न तेजस्तेजस्वी प्रसृतमपरेषा विषहते।**

**न तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।**

**मयूखैरश्रान्तं तपति यदि देवो दिनकरः**

**किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति।।**[14]

महावीरचरितेऽपि द्वितीयांके क्रोधाविष्टपरशुरामः जनकस्य अन्तःपुरे रामस्य यदा अन्वेषणं कुर्वन् अस्ति तदा रामः 'अयमहं भोः! इतो इतो भवान्' कथयन् स्वयं तस्य पुरतः उपस्थितः भवति। प्रसंगेऽस्मिन् परशुरामस्य उक्तिरियं दृष्टान्तनाट्यलक्षणस्य निर्मितं करोति–

**अन्विष्यतः प्रमथनाय ममापि दर्पा–**

**दात्मानमर्पयसि जातिविशुद्धसत्त्वः।**

**गन्धद्विपेन्द्रकलभः करिकुम्भकूट–**

**कुट्टाकपाणिकुलिशस्य यथा मृगारेः।**[15]

पदोच्चयः–

एकस्य अर्थस्य प्रकटनार्थं यदा अनेकानां शब्दानां प्रयोगः क्रियते तदा पदोच्चयनाट्यलक्षणं भवति। अस्य नाट्यलक्षणस्य स्वरूपं नाट्यशास्त्रे एवं प्रकारेण दत्तमस्ति।[16]

रामचरितस्य तृतीयांके वासन्त्याः कथनमिदं पदोच्चयनाट्यलक्षणस्य उदाहरणमस्ति। कथनं एवं प्रकारेण अस्ति–

**त्वं जीवितं त्वमसि में ह्रदयं द्वितीयं**

**त्वं कौमुदी नयनोयोरमृतं त्वमंके।**

**इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां**

**तामेव शान्तमथवा किमतःपरेण।।**[17]

महावीरचरितेऽपि परशुरामस्य वर्णनप्रसंगे रामेण तथैव रामस्य वर्णनप्रसंगे परशुरामेण पदोच्चयस्य प्रयोगः कृतः–

परशुरामस्य वर्णनं रामेण एवं प्रकारेण कृतमस्ति–

**अयं स भृगुननन्दनस्त्रिभुवनैकवीरो मुनि–**

**र्य एष निवहो महानिव दुरासदस्तेजसाम्।**

**प्रतापतपसोरिव व्यतिकरस्फुरन्मूर्तिमान्–**

**प्रचण्ड इव पिण्डतामुपगतश्च वीरो रसः।।**[18]

एवमेव रामस्य वर्णनं परशुरामेण एवं प्रकारेण कृतमस्ति–

**त्रातुं लोकानिव परिणतः कायथानस्त्रवेदः**

**क्षात्रो धर्मः श्रित इव तनु ब्रह्मकोशस्य गुप्त्यै।**

**सामर्थ्यानामिव समुदयः संचयो व गुणानां**

**प्रादुर्भूय स्थित इस जगत्पुण्यनिर्माणराशिः।।**[19]

मालतीमाधवेऽपि माधवस्य उक्तिरियं पदोच्चय नाट्यलक्षणस्य उदाहरणमस्ति–

**लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेण च।**

**प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।**

**सा नश्चेतसि कीलितेव विशिखैश्चेतो भुवः पंचभि–**

**श्चिन्तासततिन्तुजालनिबिडस्यूतेव लग्ना प्रिया।**[20]

प्राप्तिः–

प्राप्ति इति नाट्यलक्षणस्य स्वरूपं–

**दृष्ट्वैवायवान् कांश्चिद्भावो यत्रानुमीयते।**

**प्राप्तिं तामभिजानीयाल्लक्षणं नाटकाश्रयम्।।**[21]

चेष्टां दृष्ट्वा सूचनाभिः वा कस्यापि भावस्य अनुमानं यदा क्रियते तदा प्राप्तिर्नामकं नाट्यलक्षणं भवति। 'श्री बाबूलालशुक्ल–शास्त्री महोदयेन' इदं श्रेष्ठनाट्यलक्षणमस्ति' इति निरूपितं स्वसंपादिते नाट्यशास्त्रग्रन्थे।[22]

महावीरचरितस्य पंचांकप्रारम्भे सम्पातिः जटायोः आगमनस्य अनुमानं करोति तत्र 'प्राप्ति' इति नाट्यलक्षणं भवति–

**पर्यायात्क्षणदृष्टयनष्टककुभः संवर्तविस्तारयो–**
**नींहारीकृतमेघमोचितधुताव्यक्तस्फुरद्विद्युतः।**
**आरात्कीर्णकणात्फणीकृतगुरुग्रावोच्चयश्रेणयः**
**रयै नेयस्य बृहत्पतत्रधुतयः प्रश्चापयन्त्यागमम्।।**[23]

उत्तररामचरितस्य तृतीयांके रामस्य कथनमिदं 'प्राप्ति' इति नाट्यलक्षणस्य उदाहरणमस्ति–

**ए एषायं तस्यास्तदतिकरौपम्यसुभगो**
**मया लब्धः पाणिर्ललितलवलीकन्दलनिभः।**[24]

सिद्धिः

उत्तररामचरितस्य तृतीयाङ्के सिद्धिर्नामकं नाट्यलक्षणमस्ति। अस्मिन् अंके समसावासन्त्यौ सीतारामाभ्यां प्रति कथयति–

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः

**स च कुलपनिराधश्छदसां य प्रयोक्ता।**
**स च मुनिरनुयातारुन्धतीको वसिष्ठ–**
**स्तव वितरतु भद्रं भूयसे मंगलाय।।**[25]

महावीरचरितेऽपि पूर्णताज्ञापनाय यत्र अनेकानां जेष्ठानां नामसंकीर्तनं भवति तत्र 'सिद्धि' इति नाट्यलक्षणं भवति–

**बहूनान्तु प्रधानानां नाम यत्राभिकीर्त्यते**
**अभिप्रेतार्थसिद्ध्यर्थं सा सिद्धिरभिधीयते।**[26]

पृच्छाः–

अस्य नाट्यलक्षणस्य स्वरूपं नाट्यशास्त्रे एवं प्रकारेण वर्णितं अस्ति–

**यत्राकारोद्भवैवाक्यैरात्मानमथवा परम्।**
**पृच्छन्निवाभिधत्तेऽर्थं सा पृच्छेत्यभिसंज्ञिता।।**[27]

भवभूतेः त्रिषु रूपकेषु अस्य नाट्यलक्षणस्य प्रयोगः दृश्यते।

महावीरचरितस्य पंचमांके वालिसुग्रीवयोः सम्भाषणे पृच्छाऽस्ति। पंचमांकस्य अन्ते सम्भाषणमिदमस्ति। सम्भाषणेऽस्मिन् वाली सुग्रीवं प्रति प्रश्नं करोति। सुग्रीवः तेषां प्रश्नानां उत्तरं ददाति। कानिचित् प्रश्नोत्तरणि एव प्रकारेण सन्ति–

वाली– वत्स! कथय कस्तवास्मि?

सुग्रीवः – गुरुः स्वमी च।

वाली – त्वं तु मम कः?

सुग्रीवं – शिष्यः प्रेष्यश्च।

वाली – वत्स! कथय क आवयोरन्योन्य धर्मः?

सुग्रीवः – वशित्वं वो वश्यता च मम।[28]

मालतीमाावस्य नवमांके 'पृच्छा' इति नाट्यलक्षणस्य निदर्शनं भवति। माधवः मालतीविषयकान् प्रश्नान् पृच्छति–

**भवद्भिः सर्वांगप्रकृतिरमणीया कुलवधू–**
**रिहस्थैर्दृष्टा व विदितमथवास्याः किमभवत्।**
**वयोऽवस्थां तस्याः श्रृणुत,सुहृदो यत्र मदनः**
**प्रगल्भव्यापारश्चरति हृदि मुग्धश्च वपुषि।।**

उत्तररामचरितस्य चतुर्थांके लवः कौशल्याजनकायोः प्रश्नानां उत्तराणि ददाति। एते प्रश्नाः 'पृच्छा' इति नाट्यलक्षणस्य सर्जनं कुर्वन्ति। प्रश्नोत्तराणि एवं प्रकारेण सन्तिः–

कौसल्या– जात! अस्ति ते माता? स्मरसि वा तातम्।

लवः– नहि।

कौसल्या– ततः स्य त्वम्?

लवः भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

कौसल्या– अयि तात! कथयितव्यं कथय।

लवः – तावदेव जानामि।

लवः – आर्य! क एष चन्द्रकेतुर्नाम?

जनकः – जानामि रामलक्ष्मणौ दाशरथी?

लवः – एतावेव रामायणकथापुरुषौ?

जनकः – अथ किम्?

लव :– तत्कथं न जानामि?[29]

एवं प्रकारेण भवभूतेः रूपकेषु नाट्यलक्षणानाम् अन्वेषणं कर्तुं शक्यते। नाट्यलक्षणं गुणालंकाराभ्यां पृथग् अस्ति। काव्यस्य शब्दार्थगतशरीरे पृथग्रूपेण यत्पदं सिद्धं भवति तत् लक्षणम् इति वक्तुं शक्यते। लक्षणेनानेन अरसात्मककाव्यात् रसात्मककाव्यं भिन्नं भवति। गुणालंकारयोः सम्बन्धः शब्दार्थाभ्यां सह भवति परन्तु लक्षणं पूर्णतः कविव्यापारेण सहसम्बद्धः अस्ति। यतोहि काव्ये शब्दार्थगतवैचित्रस्य आधानं कविप्रयत्नेननैव भवति। काव्ये वैचित्र्यस्य आधानं येन प्रयत्नेन सम्भवति तत्समग्रं लक्षणमित्यैव। एतस्मात् कारणात् काव्यं 'कविकर्म' इत्युच्यते। लौकिकानां तत्वानाम् अलौककस्वरूपे प्रकटनं लक्षणेनैव सम्भवति। काव्येषु आलकाराणां स्थानं लक्षणानां

आश्रयेणैव सम्भवति। एवं प्रकारेण अर्थालंकाराणां बीजभूत तथा च कथाशरीरे वैचित्र्यप्रदायकं वक्रोक्तिरूपसम्पन्नं समस्तचमत्काराणां 'लक्षण' इति शब्देन व्यह्नियते।

दृश्यकाव्ये नाट्यलक्षणानि स्वमहिम्ना स्वयमेव प्रोद्भासितानि भवन्ति। गुणालंकारयोः अपेक्षा तत्रः भवति। लक्षणानि काव्ये सौन्दर्यस्य आधानं कुर्वन्ति। कथाशरीरेण मण्डिते दृश्यकाव्ये लक्षणानां संयोजन आवश्यमेव क्रियते। मुक्तकादि खण्डकाव्येषु एतेषां प्रयोगः न भवति। अतएव भरतेन मुक्तकेभ्यः भेदप्रदर्शनाय 'काव्यबन्धास्तु कर्त्तव्या' इत्युक्तम्। चमत्कारवैशिष्टत्वात् भरतेन षट्त्रिंशलक्षणानाम् उल्लेखः कृतः। लक्षणानि अनेकविधानि भवितुं अर्हन्ति।

एवं प्रकारेण भवभूतेः त्रिषु रूपकेषु षट्त्रिंशत्नाट्यलक्षणानां यथास्थान प्रयोगः दृश्यते। यदा भवभूतेः रूपकाणां नाट्यवैभवस्य चर्चा भवति तदा वाचिकाभिनयान्तर्गतानां एतेष.. नाट्यलाणानां अनुशीलनम् अपेक्षितं भवति।

सन्दर्भ ग्रन्थ


1. नाट्यशास्त्रं 1/1 अभि0शा0
2. गद्यं पद्यं च मिश्रं तत् त्रिधैव व्यवस्थितम्– (काव्यादर्शः 1/11)
3. नाट्यशास्त्रं 14/71
4. नाट्यशास्त्रं 8/6–7
5. सा0द0 6/2
6. ना0शा0 8/9
7. अभिनय दर्पण, 1
8. ना0शा0 17/1–5
9. उत्तररामचरितम् 2/4
10. ना0शा0 10/9
11. उत्तररामचरितम् 1/41
12. यत्प्रयोजनसामर्थ्याद्वाक्यमिष्टार्थसाधनम्।
    समासोक्तं मनोग्राही सह हेतुरिति संज्ञितः।। (ना0शा0 17/10)
13. सर्वलोक मनोग्राही यस्तु पक्षार्थसाधकः।
    हेतनिदर्शनकृतः स दृष्टान्त इति स्मृतः – ना0शा0 17/12
14. उत्तररामचरितम् 6/41
15. महावीरचरितम् 2/31
16. बहूनान्तु प्रयुक्तानां पदानां बहुभिः पदैः। उच्चयः सदृशार्थो यः स विज्ञेयः पदोच्चयः।। ना0शा0 17/22

17. उत्तररामचरितम् 3/26

18. महावीरचरितम् 2/23

19. 19. महावीरचरितम् 2/41

20 मालतीमाधवम 5/10

21.ना0शा0 17/13

22.नाट्यशास्त्रम् 'प्रदीप' हिन्दी व्याख्योपेतम्, द्वितीयो भागः, पृष्ठांक 278

23.महावीरचरितम्, 5/1

24.उत्तररामचरितम् 3/40

25. उत्तररामचरितम् 3/48

26 महावीरचरितम् 2/23

27 ना0शा0 17/17

28. महावीरचरितम्, पंचमांके

29. उत्तररामचरितम्– चतुर्थांके